# पंचमोऽध्यायः

# कर्ममीमासायाः

# तुलनात्मकमध्ययनम्

# पंचमोऽध्यायः

# कर्ममीमासायाः तुलनात्मकमध्ययनम्

**प्रथमो विरामः** ज्ञानोपासनाकाण्डयोः कर्मवैशिष्ट्यम्।

**द्वितीयो विरामः** कर्मणां औचित्यम्।

**तृतीयो विरामः** कर्मभिःचतुर्विधपुरूषार्थ प्राप्त्युपायः।

१. धर्मार्थकाममोक्षाणां प्राप्तये कर्मयोगदानम्।

२. मोक्षे कर्मविचारः।

## प्रथमोविरामः

# ज्ञानोपासनाकाण्डयोः कर्मवैशिष्ट्यम्

उपनिषदसाहित्ये सर्वाः उपनिषदाः प्रमुखाः सन्ति तथापि एकादश उपनिषत्सु प्राधान्यं स्वीक्रियते।

ईशादिउपनिषत्सु ब्रह्मोपासनायाः वर्णनम् प्राप्यते।

छान्दोग्योपनिषदे अपि ब्रह्मोपासना प्रथमखण्ड तः सप्तमाध्यायस्य पंचाशतखण्ड पर्यन्तम् विविधरूपेण उपासना स्वरूपम् उपलभ्यते।

इयमेव ज्ञानोपासना कथ्यते। बृहदारण्यकोपनिषदि याज्ञवल्क्य महर्षिणा गार्गीम् प्रति आत्मस्वरूपोपासना निगदिता। चतुर्थ अध्यायस्य प्रथम ब्राह्मणे जनक-याज्ञवल्क्य संवादे आत्मस्वरूप वर्णनम् कामना कोशेने ब्रह्मप्राप्तिः इत्यादिकम् कथितम्। यथा --

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।

ततो भूय इ वते य उ विद्यया ँरताः।।

अनन्दा नाम ते लोका अन्धेन तमसावृताः।

ता ँस्ते प्रेत्याभिगच्छन्त्याविदागुंसोऽबुधो जनाः।।

आत्मानं चेद्विजानीयपादयमस्तीति पूरुषः।

किमिच्छत्वा कस्य कामाय शरीरमनुसंज्वरेत।।

यस्यानुवित्तः प्रतिबुद्ध आत्मस्मिन संदेहोगहने प्रविष्टाः।

स विश्वकृतस हि सर्वस्य कर्त्ता तस्य लोकाः स लोक एव।।

इहैव सन्तोऽथ विद्यस्त,यं न चेदवेतिर्महती विनष्टः।
ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति।।
यदैतमनुपश्यत्यात्मानं देवमज्जसा।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते।।[1]

अत्र महानअजन्मा आत्मा अन्न भक्षण कर्तुः कर्मफलं ददाति। सम्पूर्ण कर्मफलाय प्राप्तिः भवति इति याज्ञवल्क्यः कथयति तथैव पच्चमाध्यायेऽपि ब्रह्मोपासनायाः पच्चदश ब्राह्मणेषु उपदेशः वर्तते। अस्याः उपासनायाः वैशिष्ट्यं तु अस्तिएव तथापि कर्मोपासनायाः अपि वैशिष्ट्यम् अनेकाषु उपनिषत्सु उपलभ्यते।

जाबालिदर्शनोपनिषदि नियमानां यमानां यौगिकासनानां, धारणादि नाम च फलं आत्मानुभूतिः एव कथ्यते। अत्र ज्ञानमार्गस्य काठिन्यं सर्वैः अनुभूयतें कर्ममार्गस्य एतत् काठिन्यं नास्ति।

त्रिपादिविभूतिमहानारायणोपनिषदि मोक्षमार्गस्य अनेके उपायाः निगदिता। तत्र कर्मोपासनायाः स्वरूपं यन्त्रोपासनया निगदितम्। नारदपारिव्राजकोपनिषदि मोक्षमार्गस्य वर्णनम् अपि च

---

1. बृहदारण्यक. 4/4/10-15

धर्मपालनस्य महत्वम् अस्ति। तत्र कुटीचकादि नाम भेदः ब्रह्मसूत्र वर्णनम् च अत्र प्राप्यते।

गीतोपनिषदि आत्मानम् ज्योतिः इति कथ्यते --

''ज्योतिषामपि तद्ज्योतिः।''[1]

अत्र ज्योतिशब्दस्यार्थः अवभाषकः, प्रकाशकः चैतन्यं च। अयं आत्मा सर्वत्र भूतत्वात अवांग मनसः गोचरः वर्तते। तमस्ति नास्ति च इति भावेन बुद्धिः विषयः न कर्तुम् शक्यते। स तु अप्रमेयः अनेन कारणेन बृद्धि विषयः नास्ति।

अयं आत्मा सर्वाश्रयः किन्तु सर्वविलक्षणः अपि अस्ति। अनेन कारणेन गुरुंशिष्यः पृचछति यदि अयं आतमा सर्वत्र विद्यमानत्वात् तर्हि तदोपलब्धि कथं न भवति। इयं शंकासमाधनाय एव गुरुः कथयति --

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते।
ज्ञानं ज्ञेयं ज्ञानगमयं हृदि सर्वस्य विशिष्ठतम्।।[1]

अनेन वर्णनेन ज्ञायते यत् आत्मा असङ्गः वर्तते। अयं आत्मा ज्ञानोपासनया प्राप्यते किन्तु मन्दभाग्यैः न ज्ञातुं शक्यते।

ज्ञानमेकं सदा भाति सर्वथावस्थासु निर्मलमम्।
मन्दभाग्य न जाननन्ति स्वरूपं केवलं बृहदा।।[2]

---

1. गीता - 13/17
2. सदाचारानुसंधन

ज्ञानोपासना आतमानुसंधानेन परिपूर्णा भवति। कर्मोपासना द्वारा अपि ब्रह्मसायुज्यम् कर्तुमशक्यते।

यथा --

सकारब्रह्मोपासनाया: अपि मोक्षप्राप्ति: जायते। अतएव ज्ञानोपासना समक्षे कर्मोपासना सरला, रुचिरा, सहजा च वर्तते।

सामवेदीय जाबालदर्शनोपनिषदि अस्य उपासनाया: विवेचनं समारोहेण उपलभ्यते। तत्र यौगिक आसनै: नाड़ी परिचयेन च सायुज्यं प्राप्यते। समाधिना च फलं प्राप्ति: उपलभ्यते।

अथर्ववेदीय गणपति उपनिनिषदि गणपति माहात्म्यं च पूजन फलं मन्त्रसिद्धि: महापातकान मुक्ति: भवति। अनेन सह सा सर्वज्ञ: अपि भवति।

कलिसंतरणोपनिषदि श्रीरामस्य षोडशनाम्ना चतुर्विधामुक्ति: प्राप्यते।

कृष्णोपनिषदि रामपनिषदि च रामकृष्णयो: प्राप्ति साधनानि वर्णितानि।

सूर्योपनिषदि - सूर्योपासनया सर्वम् भवति।

अनेन ज्ञायते यत् ज्ञानोपासनायाम् चित्तादीनां शुद्धिकरणाय अनेकानि कठिनानि साधनानि कथितानि किन्तु कर्मोपासनया अपि ब्रह्मसायुज्यं भवति इति उपनिषदां सिद्धान्त: वर्तते।

ज्ञानोपासनाया: कर्मवैशिष्ट्यं सर्वम् निगदितम् इति।

यद्वै तत्सुकृतं रसो वै सः। रस ँ ह्योवायं लब्ध्वाऽऽनन्दी भवति। को ह्यवान्यात्मकः प्राण्याद् यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति।[1]

सर्वे वेदा यत्पदमनन्ति वेदैश्च सर्वैरहेव वेधः।[2]

अहं हि सर्वयज्ञानां भेक्ता प्रभुरेव च।[3]

अस्मिन् मन्त्रे अपि कर्मोपासनायाः वैशिष्ट्यम् उद्घोषयति। अनेन सर्वासु उपनिषत्सु प्रायेण कर्ममार्गस्य वैशिष्ट्यं प्रतीयते इति।

---

1. तैत्तरीय. 7/2
2. गीता - 15/15
3. गीता - 9/24

# द्वितीयोविराम्

# कर्मणां औचित्यम्

भारतीय दर्शनशास्त्रेषु मीमांसाशास्त्र कर्मविषयकं विवेचनं सर्वाधिकं प्राप्यते। महर्षि जैमिनना सूत्रेषु कर्म-धर्मयोः सम्यक् विचारः प्राप्यते। यदा वेदलक्षणं क्रियते तत्र ब्राह्मणरूप वेदस्य शीर्षाङ्गरूपेण अर्थवादः उपस्थापिता। ब्राह्मण वाक्य भेदे कर्मोत्तपत्तिवाक्यं एकः भेदः स्वीकृतः। इदं कर्म कर्तव्यं इति बोध्यते। तदा कर्मोत्पत्ति वाक्यं कथ्यते।

ततः सफल कर्मोत्पत्ति वाक्यम् भवति। इति मीमांसकानाम् मते वर्तते। तत्र सामान्यतः कर्मः द्विविधं मन्यते। यथा --

1. अर्थकर्म
2. गुणकर्म च।

गुणकर्मऽपि द्विविधं भवति। यथा --

1. संसारकम् प्रत्तिपत्ति कर्म
2. उपयोगक्ष्यसंस्कारच्च।

अनेन ज्ञायते जीवने कर्मावश्यकं भवति। अस्मिन् विषये मीमांसायाम् विस्तरेण वर्णितमस्ति।

यतोहि - गुणकर्ममपि चतुर्विधं भवति।

1. उत्पत्ति कर्म
2. आपतीकर्म

3. विकृतिकर्म

4. संस्कृतिकर्म च।

एते भेदा: उत्पत्ति संस्कारेण संस्काररूपा: सन्ति। अर्थकर्म त्रिविधं भवति।

1. नित्यकर्म

2. नैमित्तिककर्म

3. काम्यकर्म च।

**नित्यकर्म :---**

प्रत्यत्वाय साधनानि नित्यकर्मणि।

**नैमित्तककर्म :--**

यत्कर्म येन निमित्तेन क्रियते तदा नैमित्तक कर्म कथ्यते।

**काम्यकर्म :--** काम्यकर्म त्रिविधं भवति।

1. केवलं ऐहिक फलकम्

2. आमुषिक फलकम्

3. ऐहिकामुषिकफलकम् च।

प्रथमम् अस्मिन् लोके फलं ददाति। द्वितीयं परलोके फलं ददाति। अनेन ज्ञायते जीवने कर्मौचितयम् सिद्धयति। मनुनाऽपि कथितं यत् --

अकुर्वन् विहतं कर्म प्रायश्चितीयते नर:।

नित्यं सदस यावदायुर्न कदाचितति नर:।।

उपेत्यति क्रमे दोष श्रुतेरत्यागदर्शनात्।
फला श्रुतेर्वीप्सया च तन्नित्य मिह कीर्तितम्।।[1]

तथैव महर्षि व्यासेन लिखितम् यत् --

नित्यं नैमित्तकं कामयामिति कर्म त्रिधामतम्।
त्रिविधं तच्च वक्ष्यामि गृहस्थास्यावधार्यतम्।।[2]

धर्मशास्त्रस्य ग्रन्थेषु कर्मणः वैशिष्ट्यम् औचितयम् प्रयोजनम् च कारणसहितं व्यवस्थापितम्।

एततपूर्वम् अनेकाषु उपनिषत्सु कर्मवैशिष्ट्यं निगदितम्। तदवदेव गीतायामपि कर्मविषये अनकेषु स्थलेषु प्राप्यते। यथा -

न हि कश्चित क्षण्मपि जातु तिष्ठत्य कर्मकृता।[3]

कर्मेन्द्रियमपि संयम्य य आस्ते मनसा स्मरन।
इन्द्रियार्थन विमूढात्मा मिथ्याचारः उच्यते।।[4]

कर्म ब्रह्मोदभवं विद्धि।[5]

यत करोषि ---- तत् कुरुष्व मदर्पणमम्।[6]

---

1. मनु.
2. व्यास. - 3/1
3. गीता - 3/5
4. गीता - 3/6
5. गीता - 3/15
6. गीता - 9/27

यस्त्वात्मरतिरेव स्यात आत्मतृपतश्च मानवः।

आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते।।

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।[1]

युज्जन्नेव सदात्मानं योगी नियत मानसः।

शान्तिं निर्वाणपरमां मत्संथामधिगच्छति।।[2]

अनेन सिद्धयति यत् अकर्मण्यत्वम् न स्वीकार्यम्। एतेन मिथ्याचारः प्रवर्तते। तेन कारणेन नियतकर्म कर्तव्यम् अस्ति। यथाक्तं कृष्णेन ---

एषु शास्त्रेषु धर्मशास्त्रेषु गीता उपनिषत्सु च सतकर्मविषयकम् औचित्यम् वर्णितम् तत् तु वैदिक कर्मानुसारेणैव कथितम्। यतोहि वेदेषु अनेक स्थलेषु अस्य कर्मणाः प्रयोजनं औचित्यं उपयोगित्वं च स्वीकृतम्।

रामानुजाचार्यकृत श्रीकृष्णभाष्येऽपि कर्मौचित्यम् निर्बोधितम् --

विहितात्वाच्चाश्रमकर्मपि।[3] सह कारित्वेन च।[4]

अनेन कारणेन गीताकारेऽपि कर्मयोगस्य वैशिष्ट्यं उपस्थापितम्। यथा

---

1. गीता - 3/ 17-18
2. गीता - 6/15
3. रामायण भाष्य - 3/4/32
4. रामायण भाष्य - 3/4/ 33

सन्यासः कर्मयोगश्च निःश्रेयास्करावभौ।

तयोस्तु कर्मसन्यासात् कर्मयोगो विशिष्यते।।[1]

कर्मधारणोपरान्ते किम् कर्म कथं क्रियते इत्यपि विचारः धर्मशास्त्रे प्राप्यते। तथैव गीतायामपि वर्णितं। यथा ---

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः

यज्ञदानतपः कर्म न तयाज्यमिति चापरे।।[2]

निश्चयं श्रुणु मे तत्र त्यागे भरतसत्तम्।

त्यागो हि पुरुषव्याघ्र त्रिविधः समप्रकीर्तितः।।[3]

यज्ञदानतपः कर्म न त्याज्यं कार्यमेच तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।
एतान्यपितु कर्माणि सङ्गं तयकत्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।।
नियतस्य तु सन्यासः कर्मणो नापद्यते।
मोहात्तस्य परित्यागः तामसः परिकीर्तितः।।
दुःखमित्येव यत् कर्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्।।

---

1. गीता - 5/2
2. गीता - 18/3
3. गीता - 18/4

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।

सङ्गं त्यक्त्वा फलं चैव स तयागः सात्त्विको मतः।।[1]

एतेषु ग्रन्थेषु यत् कर्म विषयकं वर्णनं औचित्यं कथितं तथैव भागवतेऽपि इतरमोक्षशास्त्रेषु च यत्र-यत्र फलं तत्र परोक्षरूपेण फलरूप मात्र ईश्वरः एव। ईश्वरस्याराधनमेव कर्मभवति। समेषां कर्मणां औचित्यम् जीवने सिद्धयति।

धर्मस्यकर्म श्रेयस्करं यस्य उदाहरणानि अनेकानि वेदेषु प्राप्तानि भवन्ति। ऋग्वेदे, यजुर्वेदे च कर्म औचित्यस्य अनेके मन्त्राः सन्ति। महाभारते कथितम् यत तदेव श्रीमद्‌भागवतेऽपि वर्णितम् --

कर्म श्रेयसि मूढानां श्रेय एवं भवेदिह।

इति भारतमाख्यानं कृप्या मुनिना कृतम्।।[2]

तथैव सर्वासु उपनिषत्सु कर्मौचितयं न्यूनाधिकरूपेण प्राप्यते इति।

---

1. गीता - 18/ 5-9
2. श्रीमद. भाग. - 1/4/25

# तृतीयो विरामः

## कर्मभिःचतुर्विधपुरूषार्थ प्राप्त्युपायः

यद्यपि सन्ति प्रख्याताः धर्मार्थकाममोक्षाख्याः चत्वारः पुरुषार्थाः तथापि उपनिषदः धर्मार्थकामात्मकं त्रिवर्गमपहाय प्रधानतया परमपुरुषार्थस्याथवा मोक्षस्यैव वर्णनं कुर्वन्ति अस्यां मोक्षावस्थायां जीवः एष आत्मापहतपाप्मा विजरोऽविमृत्युविशोकोऽविजिधत्सोऽपिपासः सत्यकामः सत्यसंकल्पः। इति श्रुत्यनुसारेण आविर्भूतगुणाष्टको भवति। स यदा कामयते यत् मदीया पूर्वेषु कति मातर अभुवन् कति चाभूवन् पितरः तदा तस्य सत्यसंकल्पस्य मकालमेव पूवेजन्मनां सर्वान् जीवान् मुक्तान् क्रोति। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिा । इति श्रुत्यनुसारेण मुक्तो जीवः परमत्मनः सत्यसंकल्पेनैव भोगान् लभते परञ्चात्यन्तसाम्यापन्ना अपि मुक्ताः नित्या अपि जीवाः जगद्व्यापारं कर्तुं नहि प्रभ वन्ति इति प्रतिपादयामास भगवान्बादरायणः। जगद्व्यापारवर्जत्वादिति शारीरके सूत्रे।

अनेन विवेचनेनायमर्थः सम्पन्नो यत् सर्वा उपनिषदः जगति जनिमतां जननमरणपदवीजं धालानां जीवानामात्मोज्जीवनाय ततवहितपुरुषार्थानां विशदं विवेचयन्तीति शम्॥

अनेकभविकं कर्म दग्धबीजविाग्निभिः।

भविष्यदपि संरुध्दं येनेदं तध्दिभोगतः॥

## 1. धमार्थकाममोक्षणां प्राप्तये कर्मयोगदानम्

अस्मिन् जगति मनुष्याणां सृष्टिः नितानतमव अद्वितीया वर्तते। यतोहि सर्वेषां जीवानाम् रचना भागायैव। किन्तु मनुष्याणां भोगाय मोक्षाय च जाता। तर्हि कोनाम् मोक्षः, कथं तस्य प्राप्तिः इत्यादिषु किम् कर्तव्यम्, कम् हेयः इति प्राप्त्यर्थम् प्राप्तिरेव। इदमेव परमं प्रयोजनम् यतोहि–कश्चकामः, कश्चमोक्षः इति प्राप्त्यार्मि् दर्शनेषु मार्गत्रयम् वर्तते--

1. ज्ञानमार्गः।
2. भक्तिमार्गः
3. कर्ममार्गश्च।

त्रिषु मार्गेषु कश्च प्रधानः इत्यपि विचारणीयो विषयः सञ्जायते।

ज्ञानमीमांसायाम् उपनिषद सर्वोपरि वर्तते।

भक्तिमीमांसायाम् उपासनायाः आराधनायाश्च वैशिष्ट्यम्।

कर्ममार्गे काठिन्यं यतोहि गहनोकर्मणः गतिः कर्मविषये दर्शनानाम् विमतिः। आचार्याणामपि तद्विषये विभिन्नानि मतानि दृष्टानि सन्ति। तथापि कर्मसिद्धान्तः स्वीकार्यः।

उपनिषत्सु अनेकाः उपनिषदः एतादृशाः सन्ति यत्र ज्ञान मार्गेणनैव मोक्षप्राप्तिः भवति इति उद्घोषं कुर्वन्ति।

तथापि प्रधानउपनिषत्सु धर्मदिपुरुषार्थम् कर्मद्वारैव भवितुर्महति इत्यपि प्राप्यते।

यथोक्तं कठोपनिषदि --

अविद्यायामन्तरे वर्तमानाः
स्वयं धीराः पण्डितम्मन्यमानाः।
दत्युम्यामाणा परित्यनत मूढ़ा
अन्धनैव नीयमाना यथान्धाः।।[1]

तथापि कर्मणा पितृलोकः विद्यया देवलोकः इति प्राप्यते विद्यया अमृतत्वं प्राप्यते।

‘‘अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।[2]

एतदऽमृतत्वम् प्राप्तये पुरुषार्थ चतुष्टयस्य पूर्वम् कर्मद्वारा धर्मादिज्ञानं आवश्यकं यतोहि - मनुष्याः धर्मम् कुर्वन्ति तदैव

---

1. कठोप. - 1/2/5
2. ईशा. - 14

चित्तशुद्धिः जायते, धर्माज्ञानेपरान्ते एव अर्थोपार्जनं करणीयं, अर्थोपार्जनेऽपि शास्त्रदृष्टैव शास्त्रोक्तरीत्यैव करणीयं।

शास्त्रं परितयज्य जीवनम् नैव सुकरमभवति। अनेनऽर्थोपार्जनेन कामना पूर्तिः ततः मोक्ष प्राप्ति पूर्तिः ततः मोक्ष प्राप्ति कर्तुः शक्यते, मोक्षाय च धर्मादि पुरुषार्थत्रयस्य परिपूर्णता आवश्यकी भवति।

कर्मणापि मोक्षः लभ्यते। अनेकाषु उपनिषत्सु एतस्य विवेचनं दृश्यते। कठोपनिषदे उल्लेखः अस्ति।

ऋतं पिबन्तौ सुकृत्यस्य लोक,
गुहां प्रविष्औ परमपरार्धे।
छायातपौ ब्रह्मविदो वदन्ति,
पच्चाग्रयो ये च त्रिणाचिकेताः।।[1]

जगति सुकृतस्य कर्मणः फलं प्राप्यते। अपि च जीवः ईश्वरश्च फलं पिबतः इति मन्त्रेण ज्ञायते। यतोहि - असंगोहि आत्मा जीवरूपेण सर्वम् उपभुज्यत। कर्मकरणाय उपनिषदां एकः मार्गः समुनिष्इतः। यथा -कोधर्मः, धर्मविषयो या मनुष्यः सदाचारेण आचरन्ति ते सदाचारिणः स्वलक्ष्यं प्राप्नुवन्ति।

पुराणादिषु ग्रनथेषु मनुष्याणां कर्तव्यम् निर्धारितं किम् करणीयं, किम् अकरणीयं इत्यस्य विषये ऋग्वेदादिषु प्राप्यते।

---

1. कठोप. - 1/2/1

पशून् पाहि गां मा हिंसीः,

अजां मा हिंसीः,

अविं मा हिंसीः।

इमं मा हिंसीर्द्विपादं पशुम्,

मा हिंसीरेकशफं पशुंम्,

मा हिंस्यात् सर्वा भूतानि।[1]

तथैव कर्मद्वारा धर्म प्राप्ति जायते। यदा नराः कर्मणाशुद्धिः स्वीक्रियते तदा चित्तन परमातमनः प्राप्ति कर्तमु शक्नुवन्ति। चित्ते कथं ध्यातव्यं-नान्तः प्रज्ञ न बहिः प्रज्ञं नोभयतः प्रज्ञं न पज्ञानं धनं च प्रज्ञं नाप्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यलक्षणम

चित्यमव्यमर्पदशय-मकातमप्रत्यय-सारप्रपच्चोपशमंशान्तं शिवमद्वैतम्।[2]

एतेन उपदेशेन ज्ञायते यत् किमपि दृश्यं किम् ग्राह्यं किम् कथनम्, किम् चिन्त्यम्, कोपदार्थः इत्यादिषु वस्तुषु परमात्मा निवसति। अनेन कारणेन स्वकर्मणा द्वारैव नरालोकस्य उपरि भूत्वा पुरुषार्थान् प्राप्नोति यथोक्तं महर्षि अत्रिणा --

स्वानि कर्मणि कुर्वाणा दूरे संतोऽपि मानवाः।

प्रिया भवंति लोकस्य स्वे-स्वे कर्मसवास्थिता।।[3]

---

1.यजुर्वेद

2. माण्डूक्य - 07

3. अत्रिस्मृति- श्लोक-12

अपि च धर्मप्राप्तिः भविष्यति। कर्मणैव धर्माधिकारी भवेत।

इष्टपूतौ द्विजातीनां सामानयौ धर्म साधनौ।
अधिकारी भवेच्छूदः पूत्ते धर्मे न वैदिके।।[1]

अर्थप्राप्तिः तु धर्मेणैव भवति विषयेऽसिमन् अनेकानि उदाहरणानि अनेकेषु ग्रन्थेषु प्राप्यन्ते। तथैव कामना नाशनैव ब्रह्मप्रार्प्तिऽपि भवति। बृहदारण्यकोपनिषदि चतुर्थ ब्राह्मणे यदा कामना नाशः जायते तदा ब्रह्मप्राप्तिः भवेत अस्य प्रसंगस्य समारोहेण अस्यां उपनिषदि प्राप्यते। यथा

आत्मानं चेद्विजीनीयादमस्यमीति पूरुषः
किमिच्छन्नकस्य कामाय शरीर मनुसंज्वरेत।।[2]

यस्यानुवित्तः प्रतिबद्ध आत्मसिमन संदेहो गहने प्रविष्टः।
स विश्वकृत्स हि सर्वस्य कर्त्ता-
लोकाः स उ लोक एव।।
इहैव सन्तोऽथ विदृभसतद्वयं न चेदवेतिर्महती विनष्टः।
ये तद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमवापियन्ति।।
यदैत मनुपश्यात्मानं देवमज्जुसा।
ईशानं भुतभव्यस्य न ततो विजगुप्सते।।[3]

---

1. अत्रिस्मृति- श्लोक-46
2. बृहदा. 4/10
3. बृहदा. 4/4/12-15

स्मृतिग्रन्थेषुपि स्पष्टं उच्यते मनुष्यः अध्ययनेन केवलं न मोक्षादिकम् प्राप्ति कर्तम् शक्यते अपि च मोक्षाय तु शास्त्रोक्त कर्मभिः प्राप्यते। यथा --

न शब्दशास्त्राभितस्य मोक्षो

न चैव रम्यावसथप्रियस्य।

न भोज्माच्छदनतत्परस्य,

एकान्त शीलस्य दृढव्रतस्य।।

मोक्षो भवेत् प्रीतिनिवर्त्तकस्य,

अध्यात्म योगैकरतस्य सम्यक्।

मोक्षो भवोन्नित्यमहिंसकस्य,

स्वाध्याययोगागतमानसरय।।[2]

---

1. आप्तम्ब स्मृति, 6-7

## 2.मोक्षे कर्मविचारः

मनुष्याणां कृते चतुर्विधपुरुषार्थ प्राप्त्यर्थ अनेके उपायाः शास्त्रेषु निर्दिष्टाः। दर्शनशास्त्रेषु विशेषेण विषयोऽस्मिन विचारः कृतः वर्तते। सांख्यादि दर्शनानाम् असिमनविषये किम् मतम् इत्यत्र समासेन विचार्यते।

सांख्यदर्शने मोक्षसम्बन्धिविचारः तत्शास्त्रविचारकैः सम्यक्रूपेण कृतं। इदं च सांख्यदर्शनम् सर्वथाचास्ति निरीश्वरादि दर्शनं यथा पुरुषस्य जीवात्मानियत्वैयेन अंगीकारात् त्रतेश्वरस्य जन्मिनां हेतुत्वेन अनीकाराच्च। प्रकृतिपुरुषयोः संयोगस्य ऐव जगतउत्पादकत्वं स्वीक्रियते।

सांख्यस्य प्रवक्ता कपिलमहर्षि वर्तते तेन पंचविंशति तत्वज्ञानाय सांख्यत्रयाणि विरचितानि। तत्त्वानाम् ज्ञानेन मोक्षः भवति इति।

योगदर्शने मोक्षविषये यत्चिन्तनमस्ति तत्र योगस्यैव व प्राधान्यं अस्य यागस्य क्रियात्मकोभागः अतीव जटिलः, कठिनः, दुष्करोऽपि सन् सर्वैरेव दार्शनिकबुद्धि गुहायां सन्निविष्टं तदीयं महत्वं स्वीक्रियते गीयते समाद्रियते चेति विज्ञेयम्। यत आत्मज्ञानोययोगित्वेनाऽंगीकृतस्य निदिध्यासनस्य सम्पादकत्वेन समपेक्षितानां यम- नियम- आसन- प्राणायाम्-प्रत्याहार-धारणा-ध्यान-समाधीनाम् योगेनैव सम्भवो भवितुर्महति नान्यथेति यागस्य तदीयमहत्वस्य च सर्वदार्शनिक साधारणत्वमवगम्यते। तत्रापि ज्ञानांशमधि कृत्य सांख्यदर्शनेस्यैव चास्ति साम्यमित्यवधेयम्।

मीमांसादर्शने मोक्षविषये त्रिविधः सम्बन्धा कथिताः। यतोहि मीमांसकानाम् मोक्षेहि प्रपञ्चसम्बन्धाविलयः त्रिविधाः सम्बन्धः शरीरजः, इन्द्रियजः, भोग्यपदार्थनश्भेदात्र। शास्त्रदीपिकायां उक्तम -तदस्य त्रिविधस्यापिबन्धस्य आत्यन्तिाके विलयो मोक्षः।[1] मीमांसाशास्त्रे मोक्षस्य साधनानि कानि इति दृश्यमानेकाम्यप्रतिषिद्ध कर्मणोर्बन्धनहेतुत्वम् क्तपूर्वकम्। केवलं नित्यनैमत्तिकानि कर्मणि हि बन्धनदोषाद्विनिर्मुक्तानि। कामना विशेषणानुष्ठीयमानानि कर्मणि अवश्यम्भावितयाफलैरभि-- सम्बनध्यन्ते। प्रतिषिद्वैश्चाप्युनिष्ठतैः कर्मभिरपि नियतवृत्तया अशुभफलानिजनयन्ते। अत उभे अपि ते मोक्ष परिपनिथनी। अतएव व्याज्यानि च मुमुक्षुभिः तस्मात् कामयानिषिकर्मभ्यो निवृत्तिः प्रवृत्तिश्च निलयकर्मसु माक्षप्रतिपत्यर्थम् अवश्यानुष्ठेयतयोन्नेया। मोक्षश्च न कर्ममात्रेण।

वेदांतदर्शने असिमन विषये समारोहेण विचारः कृतः। अत्र ब्रह्मज्ञोनैव मोक्षः भवति अत्रापि शांकरमते द्विरूपं हि ब्रह्म एकं नाम रूपविकारभदोपाधिविशिष्टम्। तद् विपरीतं च सर्वोपाधि विर्वगितम्। तत्र आत्मज्ञानेनैव मोक्षोजायते। कर्ममार्गे तु कर्मणापितृलाकः विद्ययादेवलोकः इतयादि विचारितम्।

---

1. शा.दी. पृ.-358

अत्र सर्वेषाम् आचार्याणाम् मतं भिन्नं-भिन्नं वर्तते। तैः आचार्यैः प्रस्थानत्रय भाष्ये कर्मविषयकोविचारः कृतः। तत्र शंकराचार्यमतम् यदस्ति तत् जीवोब्रह्मैनापरः एकमेव अद्वितीयं ब्रह्म, नेहनानास्ति किच्चन, उपनिषदृष्ट्या कथयितुं यत् --

तमात्मस्थं येऽनुपश्यन्ति

स्तेषां सुखं शाश्वतं नेतरेषाम्।

तेषां शान्तिः शाश्वती नेतरेषाम्।।[1]

वेदान्तविज्ञानसृनिनिश्चतार्थाः

सन्याससयोगाघतयः शुद्धसत्वाः।

त ब्रह्मलोकेषु परन्तकाले

परामृताः परिमुच्यन्ति सर्वे।।[2]

एवं प्रकारेण शाश्वतसुखप्राप्त्यर्थिम् मोक्षप्राप्त्यर्थिम् च उपदिशन्ति तथापि शास्त्रदृष्ट्यातूपदेशो वामदेवात्।[3]

अनेन निर्देशास शास्त्राभ्यासेन महावाक्यानाम् संशोधनेन च वामदेव ऋषिवत मुक्तिर्भवति।

---

1. मुण्डको. 3/2/5
2. मुण्डको. 3/2/6
3. ब्रह्मसूत्र

वेदानां पूर्वभागः क्रियापरकः। कर्ममात्र परकश्च समस्तानि कर्माणि कर्ममात्रमेव। उपासनाऽपि क्रियापरकाः सन्ति।

तत्र मानसिकक्रियाः भवन्ति। ब्रह्मसूत्रस्य उपनिषदां च दृष्ट्या कर्मणा मोक्षप्राप्तिः असम्भवा।

कठोपनिषदि सर्वभेदाः यत्पदमामन्ति अनुसारेण उपनिषदां तात्पर्यम् एकस्मिन्नेव तत्वेवर्तते। अतएव कर्ममार्गण मोक्षः आत्यन्तिकेन नैव भवति। इदमेव तत्वम् सर्वत्र प्राप्यते।

भारतीय दर्शनेषु पुनर्जन्मनासिद्धान्तः अद्वितीयः वर्तते। वेदादिषु विधिनिषेधयो व्यवस्था वर्तते। तत्र मोक्षनुभूति अपि च साक्षात्कारः समाधिना जायते। समाधिकरणाय अभ्यासवैराग्योः आवश्यकतावर्तते। वासनाभिरहितम् चित्तम् तत्र आवश्यकम्।यथा

यदा सर्वे प्रमुच्यन्ते कामायेऽस्य हृदि श्रिताः।
अथमर्त्योऽभूतोभवति ----।।[1]

अनेन ज्ञायते कर्मणा मुक्तिसंभवति किन्तु तत्र कर्मानिष्कामरूपेण भजेत्। ईशोपनिषदि वर्तते --

कुर्वन्नेह कर्माणि जिजीविषोद्वत समाः।

एवं त्वयि नान्यऽथेतोऽस्ति न कर्मलिप्यते नरे।।[2]

---

1. कठोप. 2/3/14

2. ईशा. 2

मनुष्यः शतं जीव्या तत्र कर्मणि न लिप्यते यो जनः फलांकांक्षा विनिर्मुच्य कर्म करोति तदा सुखेन संसारात् पार्यते।

यथा पातंजलयोगे :--

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयेषु भावाना श्चिप्रसाधनम्।।[1]

भारतीय आचार्यैं कर्मणाः क्षेत्रं मनुष्यर्प्यन्तं नैव कथितम्। अस्मिन् जगति ब्रह्मा तः कीटाणु पर्यन्तम् यावन्तः प्राणिना सन्ति तावन्तः समबन्धाः। तेषां प्रति अस्माकं किमपि कर्तव्यम् भवति।

उपनिषत्सु कर्मणां नामावली नैवस्ति अपि च सदाचारस्य मूलं उद्घाटितं।

मुण्डकोपनिषदि ब्रह्मचर्यस्य सत्यस्य च उद्घोषणां क्रियते–

सत्येन लभ्यस्तपसा ह्योष आत्मा
सम्यग्ज्ञानेन ब्रह्मचर्यण नित्यम।
अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो
यं पश्यन्ति यतयः क्षणिदोषाः।।[2]
सत्येव जयति नानृतं
सत्येन पन्था वितो देवयानः।

---

1. पातंजल. योग
2. मुण्डको.

येनाक्रमन्त्यृषयो ह्यात्पकामा

यत्र तत्सत्यस्य परमं निधानम्।।[1]

एवं प्रकारेण कर्मविषये मोक्षविषये च दार्शनिक ग्रन्थेषु विचाराः उपस्थापिताः सन्ति। कर्मणा चित्तशुद्धिः कर्मशुद्धिर्भवति, कर्मशुद्धौसति मोक्ष प्राप्तिर्भवितुं अर्हति। तत्र गहनो विचारः शास्त्रकारैः कृतः। वैष्णवाचार्यैः कर्मणा मुक्तिः भवति इतयपि उद्घोषितं तत्रापि निष्काम भावेन यत्कर्मक्रियते तदेव सिद्धिभिः जायते।

भारतीयपरम्परायां नव दर्शनानि प्रचलितानि सन्ति येषु षडास्तिकसंज्ञितानि त्रीणि नास्तिकसम्मतानि च । आस्तिकनास्तिकयोरयमेव भेदो यत्प्रथमं वेदप्रामाण्यमधिभ जतेऽपरं तद्विपरीतकम्।प्रथमे विभागे साङ्ख्ययोगन्यायवैशेषिकमीमासांवेदान्तानि द्वितीये तु चार्वाकबौध्दजैनानि परिगणितानि सन्ति।

अतो हि मीमासकाः कर्मवादिनः ।

ते हि खलुएव कर्मफलप्रदातृ मन्यन्तें॥[२]

---

1. मुण्डको.

२ - किरणागमे।१।३

अत्र हि वेदेषु तद् व्याख्याभूत

ब्राह्मणग्रन्थेषु तदङ्ग उपनिषदां मोक्षशास्त्रत्वप्रसिध्देः कीदृशो मोक्ष उपनिषत्प्रसिध्द इति प्रथमं निर्धारणीयम्। तत्र भाष्यकारादयः -अविद्यानिवृत्यापलक्षितः आनन्दो मोक्ष इत्याहुः। तत्रविद्यानिवृत्तिः आत्मतत्वज्ञानसाध्या। आनन्दश्चात्मस्वरूपमेव विज्ञानमानन्दं ब्रह्मेति श्रुतेः। तच्चात्मस्वरूपमविद्या- वृतत्वादिदानीं न प्रकाशते अविद्यानिवृतौ प्रकाशते

अविद्यानिवृतिश्चात्मस्वरूपैव अभावनामाधिकरणात्मकत्वात्। मोक्षस्य वास्तविक स्वरूपमस्ति पूर्णता। 'पूर्णमेवावशिष्यते'। अतएव पुर्णानन्दस्य पूर्ण निभ 'यतायाः पूर्णस्वतन्त्रतायाः एव पूर्णज्ञानस्य मुमुक्षु पूर्णानन्दादिद्वारा पूर्णरहितं विना स्वयमेव पूर्णमुक्तं भवति ।अतएव उपनिषदां पूर्ण ब्रह्मभावप्राप्त्यर्थं हि मोक्षस्य वास्तविक स्वरूपं कथितम् । अतः उपनिषदां मोक्षस्वरूपप्रतिपादकं किञ्चित् वचनं उद्धृतासि ।

स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभय॑ हि वै ब्रह्म भवति य एवं वेद ॥[1]

---

१- बृ ॥उ ॥४ ॥४ ॥२५

सः महान् पूर्णात्मा जन्म-जरा-मृत्यु रहितः अमृतःअभयः ब्रह्मस्वरूपैव एवं प्रकारेण यः जानन्ति स स्वयं अभयं ब्रह्मसस्वरूपमेव भवति।

तत्र प्रमाणं पुरुष एवेदं विश्वं तपो ब्रह्म परामृतम्। एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह इत्यस्य कर्मरूपां ग्रन्थिं नाशयतीत्यर्थ इत्याहुः तन्न अज्ञानस्य ज्ञानैकनिवर्त्यत्वात् । अविद्यापदस्य कर्मपरत्वे लक्षणापत्तेश्च।अत्र पुरुष एवेदं विश्वमिति प्रपञ्चमिथ्यात्वं विद्यायाद्वितीयपुरुषज्ञानाद विद्यानिवृत्तिं कथयति।

उपनिषत्सु च अनेन जीवेनात्मनाऽनु प्रविश्य इत्युक्तत्वात् जीवरूपेण पूर्वकल्पानुभुतेन शरीरं प्रविष्टः परमात्मैव जीवः ।विशिष्टाद्वैत नस्तु परमात्मनः सर्वगतस्य निष्क्रियस्य शरीरे प्रवेशमनुपपन्नं मन्यमानाः जीवविशिष्ट ब्रह्मणः प्रवेशं जीवप्रवेशपर्यवसितं कल्पयन्ति।

यद्यपि कर्मानुष्ठानं जन्मान्तरीयस्वर्गादिफलोद्देशेन क्रियमाणं जन्मानतरास्तित्वं शरीरादिव्यतिरेकं च जीवस्य सूचयत्येव तथापि हितैषिवचनादिलब्धस्यास्यैव विश्वासस्य दृढिकरणायदेहात्मवाद निरासदृढी -करणाय चोत्तरमीमांसायामेक आतमनः इत्याधिकरणं दृश्यते।

तथा मोक्षधर्मे भगवान्परमेश्वरऽऽह :-

ज्ञानं  तु केवलं सम्यगपवर्गफलप्रदम्।

तस्माद् भवद्भिर्विमलं ज्ञानं कैवल्यसानम्॥

विज्ञातव्यं प्रयत्नेन श्रोतव्यं दृश्यमेव च  ।

एकः सर्वत्रगो ह्यात्मा केवलश्चितिमात्रकः॥

आनन्दो निर्मलोनित्यः सयादेतत्सांख्यदर्शनम्।

एतदेव परं ज्ञानं एतन्मोक्षोऽनुगीयते॥[१]

एतत्कैवल्यममलं  ब्रह्मभावश्च वर्णितः।

गच्छन्ति मां महात्मानं यतन्तो विश्वमीश्वरम्।

आश्रित्यैतत्परं तत्वं तन्निष्ठास्तत्परायणाः॥[२]

ज्ञानं विशिष्टं न तथा हि यज्ञाः।[३]

---

१ – मोक्षधर्म ।३।२।१०॥

२ - मोक्षधर्म ।३।२।१०॥

३ – मोक्षधर्म २।१।३२॥

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते।तस्माकर्म न कुर्वित यतयःपारदर्शिनः॥[1] तथा च ज्ञानस्यैव मोक्षसाधनत्वं मन्यमानः सर्वकर्मपरित्यागमाह भगवान् वेदाचार्यो मनुः ।[2] यथोक्तान्यापि कर्माणि परिहाय द्विजोत्तमः। आत्मज्ञाने शमे च स्याद् वेदाभ्यासे च यत्नवान्॥

तथा लैङ्गे - ज्ञानामृतेन तृप्तस्य कर्मणा प्रजया च किम्॥[3]

एवं सर्वभूते त्वयि नरमात्राभिमानिन्यज्ञे अविद्यानिमित्तोत्तरपूर्वाघ-योरश्लेषविनाशाभवात् कुर्वन्नेव सदा यावज्जीवं कर्म जिजीविषेत् इत्यज्ञस्य नरमात्राभिमानिनः शुध्दयर्थं यावज्जीवं कर्माणि दर्शयति। अत एभिरपि वाक्यैः कर्मणां शुध्दिसाधनत्व मेवावगम्यते न मोक्षसाधनत्वम्। यद्यपयुक्तं - तेनैति ब्रह्मवित्पुण्यकृतैजसश्च इति च शब्दात्समुच्चयोऽवगम्यते - तदपि प्रसिध्द श्रुति विनियोगानुसारेण वेदितव्यम् ।तथा चानुगीतासु स्पष्टमाह भगवान् कमणां शुध्दिद्वारेणैव मोक्ष साधनत्वम्।

---

१ - मोक्षधर्म १।२।१३

२ - मनुस्मृति २।३९

३ - लिङ्ग पुराण २।३।४५

नित्य नैमित्तिकैः शुध्दैः फलसंगविवर्जितैः। सत्त्वशुध्दिमवाप्याथ योगारुढो भविष्यति।

योगारुढस्ततो याति तद्विष्णोः परमं पदम्॥इति॥

वक्ष्यति भगवान् सनत्सुजातः शुध्दिद्वारेण मोक्षसाधनम् तदर्थमुक्तं तप एतत इति। ननु कथं सत्त्वशुध्दिद्वारेण मोक्षसाधनत्वं विनाऽपि सत्त्वशुध्दिं ज्ञानेनैव मोक्षसिध्यत्येव सत्यम्।[१]

---

१- श्रीसनत्सुजातीयम् ॥